4th ASSIGNMENT OF 2020-21.
CLASS - XII
Subject - SANSKRIT.

प्रश्न - 1. अधोलिखितान् गद्यांशान् पठित्वा प्रदत्तप्रश्नान् उत्तरत -

महाभारते व्यासः धर्मं शाश्वतम् अकथयत् - अतः जनैः लोभेन भयेन वा धर्मः न परित्याज्यः। महाभारतं वस्तुतः कौरवपाण्डवयोः युद्धस्य वर्णनमेव चित्रयति। प्रत्येकं वीरस्य वीरगाथा अत्र कथारूपेण वर्णिता। भगवतः श्रीकृष्णस्य सारथित्वे अर्जुनः एकाकी एव अनेकान् जयति। युद्धे पात्रयोः संवादः यदा-कदा एकम् उपाख्यानं भवति। अस्य अंशः गीतानाम्ना अस्मिन् विश्वे प्रतिष्ठितः। दैव्यः आसूर्यः सम्पदः अपि सम्यक् कथिताः अत्र। महाभारतस्य सर्वाधिकं प्रमुखं पात्रं भीष्मः अपि वर्तते।

I. एकपदेन उत्तरत -
(i) व्यासः धर्मं कीदृशम् अकथयत् ?
(ii) महाभारते कस्य वीरगाथा वर्णिता ?
(iii) कयोः संवादः भवति ?
(iv) सर्वाधिकं प्रमुखं पात्रं कः ?

II. पूर्णवाक्येन उत्तरत -
(i) महाभारतं किं चित्रयति ?
(ii) अर्जुनः अनेकान् कथं जयति ?

III. यथानिर्देशम् उत्तरत -
(i) 'धर्मं शाश्वतम्' अनयोः पदयोः विशेष्यपदं किम् ?
(ii) 'वर्तते' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?
(iii) 'कृष्णद्वैपायनः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?
(iv) 'अनेकम्' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

IV. गद्यांशस्य समुचितम् उत्तरं लिखत।

2. पत्रलेखनाभ्यास कार्यम् -

भवान् अनुरागः। भवतः मित्रं शेखरः स्वनगरमण्डले चित्रकला-प्रतियोगितायां प्रथमं पुरस्कारं लब्धवान्। तं वर्धापयितुं लिखिते पत्रे मञ्जूषापदैः रिक्तस्थानपूर्तिं कृत्वा पत्रं पुनः लिखत -



Scanned with CamScanner

दिल्ली नगरात्
पूर्व मण्डलम्
दिनांक: ——।

प्रिय सखे! —1.—!

सप्रेम नम:।

भवान् अस्मिन् वर्षे —2— चित्रकला-प्रतियोगितायां —3— मण्डलानि पराजित्य प्रथमं पुरस्कारं —4.—। एतदर्थं मनसि अहं —5— हर्षमनुभवामि। भवान् प्रायश: विचारमग्नो —6— अतएव तव चित्रे ते भावा: समागता: यान् —7— निर्णायका: तुभ्यं प्रथमं स्थानं दत्तवन्त:। एतस्मिन् विषये तव —8— अभिवादनार्हौ तव उत्साहं वर्धयितुं सदैव संलग्नौ। —9— तौ प्रति निवेदय अभिवादनम्। आशासे यद् भवान् अग्रिमवर्षे स्वदेशे प्रतियोगितासु प्रथमेव स्थानं लप्स्यते। तव भगिन्यै शुभाशिष:।

भवताम्
—10.— सखा
अनुराग:

मञ्जूषा: →

| |
|---|
| मम, स्वनगरमण्डलेषु, महान्तम्, सर्वाणि, लब्धवान्, भवति, पितरौ, दृष्ट्वा, शेखर, अभिन्न:। |

3. भवान् सञ्जय:। भवतां मित्रं विजय: प्राय: अस्वस्थ: वर्तते। तं बोधयितुं लिखिते पत्रे रिक्तस्थानानि मञ्जूषापदसाहाय्येन पूरयित्वा पत्रं पुन: लिखत —

राजकीय महाविद्यालय:
व्यास छात्रावास:
रमेशनगरम्, दिल्ली
तिथि: ——।

प्रिय —1— !

नमोनम:

भवतां पत्रेण ज्ञातम् यत् —2— स्वास्थ्यं समीचीनं नास्ति। नूनं शरीरम् एव —3— प्रथमं साधनम्। मित्र! प्राय: अस्वस्थताया: कारणं पाचनक्रियायां —4.— भवति। मया चरकशास्त्रे पठितम् यद् य: —5.— भवति ऋतो: अनुसारं च भुङ्क्ते स सर्वथा रोगमुक्त: भवति। अत: भवान् अपि —6.— भोजनं कुर्यात्, उदरस्य



Scanned with CamScanner

चतुर्थः भागः सर्वथा —7— भवेत्। भवताम् —8— अनेकाः शुभकामनाः। पितरौ —9.— मम प्रणामाञ्जलिः निवेदनीयः।

भवतां प्रिय सुहृत्

—10—.

मञ्जूषा: —

| |
|---|
| रिक्तः, विजय, विकृतिः, स्वास्थ्यलाभाय, हितकरम्, चर्मस्य, प्रीति, मितभुक्, भवताम्, सञ्जयः। |

4. लघुकथां मञ्जूषातः उचितपदैः सम्पूरयत —

मञ्जूषा: — [प्रसीदन्ति, नामभिः, लालयति, जीवनम्, जलदः, पिपासा, ददामि, विद्युत्, मयूराः, जन्मस्थानम्।]

सर्वेभ्यः जलं —1— अहम् अतः जनाः माम् मेघं —2—, वारिदः, पयोदः इति —3— अपि जानन्ति। सागरः मम —4— गगनं मम गृहं धरा मम गन्तव्यम् अस्ति। —5— मां प्रकाशयति, पवनः स्वाङ्के —6—। बालाः मां दृष्ट्वा हृष्यन्ति, जनाः —7—, कृषकाः मोदन्ते —8— च नृत्यन्ति। तापेन व्याकुलधरायाः —9— मया एव शाम्यते। अहम् एव सर्वप्राणिनां —10— अस्मि।

5. लघुकथां मञ्जूषातः उचितपदैः सम्पूरयत —

मञ्जूषा: → [याचन्ते, इति, धनिकस्य, भोजनम्, प्रार्थयते, अन्यस्मिन्। सन्तुष्टः, महत्तमः, लोभः, भिक्षुकः।]

कस्यचित् —1.— गृहात् बहिः स्थितः —2.— श्रुतवान् - देव! —3— पुत्रं ददातु।' अहो! अयम् तु स्वयमेव याचकः —4— चिन्तयित्वा भिक्षुकः अग्रे प्रस्थितः। —5— गृहे एकः व्यापारी —6— एम- भगवति! मम व्यापारे —7— भवतु।' भिक्षुकः चिन्तितवान् - "अरे! एते तु महत्तरां भिक्षां —8—। अहं तु केवलं —9— याचे। अहम् एव भाग्यवान् यतः अहं —10— अस्मि।"



Scanned with CamScanner

## अनुच्छेद लेखनम्

6. मञ्जूषायां लिखित पदानां सहायतया पञ्च संस्कृत वाक्येषु 'परिश्रमस्य महत्त्वम्' इति विषयं संस्कृतेन अनुच्छेदं लिखत।

| मञ्जूषा — |
| --- |
| परिश्रमेण, क्षुच्चा, पूर्णा, भोजनम्, मधुरम्, उद्योगिनं, विद्यायां साफल्यम्, परिश्रमी जनः, स्वावलम्बी, कार्याणि सिध्यन्ते, परिश्रमेण प्राप्तम्, अलसाः भाग्ये आश्रिताः। |

7. मञ्जूषायां लिखित पदानां सहायतया पञ्चसंस्कृत वाक्येषु 'विद्यायाः महत्त्वम्' इति विषयं संस्कृतेन अनुच्छेदं लिखत-

मञ्जूषा —

| |
| --- |
| विद्या धनम्। सर्वधन प्रधानम्। विद्वान् सर्वत्र पूज्यते। सम्मानं लभन्ते। विद्याविहीनः। पशुसमानः। विद्यया। विचारं प्रखरीकरोति। |

8. तृतीयः पाठः — "मातुराज्ञा गरीयसी" पाठ्यपुस्तकात्

नाट्यांशं पठित्वा प्रश्नान् उत्तरत -

काञ्चुकीयः — अथ ------।

रामः — अतः परं न मातुः परिवादं श्रोतुमिच्छामि। महाराजस्य वृतान्तस्तावदभिधीयताम्।

काञ्चुकीयः - ततस्तदानीम्,

शोकादवचनाद् राज्ञा हस्तेनैव विसर्जितः।
किमप्यभिमतं मन्ये मोहं च नृपतिर्गतः॥

रामः — कथं मोहमुपगतः!

(नेपथ्ये)

कथं कथं मोहमुपगत इति।
यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयाम्॥



Scanned with CamScanner

रामः - (आकर्ण्य पुरतो विलोक्य)

अक्षोभ्यः क्षोभितः केन लक्ष्मणो धैर्यसागरः।
येन रुष्टेन पश्यामि शताकीर्णमिवाग्रतः ॥

प्रश्नाः -

(क) I. एकपदेन उत्तरत -

(i) अतः परं न कस्याः परिवादं श्रोतुमिच्छामि ?

(ii) कथं किम् उपगत इति ?

II. पूर्णवाक्येन उत्तरत -

(i) तावत् कस्य वृत्तान्तः अभिधीयताम् ?

(ii) राज्ञा कस्मात् केनैव विसर्जितः ?

III. यथानिर्देशम् उत्तरत -

(i) 'निन्दाम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(ii) 'वचनात्' इति पदस्य विपर्ययपदं किं प्रयुक्तम् ?

(iii) ('गतः') इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(iv) 'राज्ञा' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(ख) प्रश्नाः →

I. एकपदेन उत्तरत -

(i) यदि कस्य मोहं न सहसे ?

(ii) कीदृशः लक्ष्मणः क्षोभितः ?

II पूर्णवाक्येन उत्तरत -

(i) किमिवाग्रतः पश्यामि ?

(ii) कः कीदृशश्च अक्षोभ्यः वर्तते ?

III. यथानिर्देशम् उत्तरत -

(i) 'पृष्ठतः' इति पदस्य विपर्ययपदं किं प्रयुक्तम् ?

(ii) 'त्वम्' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(iii) 'सिन्धुः' इति पदस्य पर्यायवाचिपदं किं प्रयुक्तम् ?

(iv) 'श्रुत्वा' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?



Scanned with CamScanner

9. अधोलिखितस्य पद्यस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्त पदैः पूरयित्वा पुनः लिखत -

मञ्जूषा- [ तिष्ठिता । इच्छन् । भुवम् । ललाटमध्ये । ]

भावार्थः - सौमित्रस्य रुषा —1— भृकुटिः सर्वं —2— दग्धुम् —3— नियति इव —4— अस्ति ।

10. अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' वाक्यांशैः सह सार्थक मेलनं कृत्वा वाक्यानि पुनः लिखत -

| क | ख |
|---|---|
| (i) भरतो वा भवेत् राजा | (अ) त्रिषु पातकेषु |
| (ii) इदानीमपि सन्देहः | (ब) भरतं हनानि |
| (iii) दोषेषु बाह्यमनुजं | (स) किं क्षमा निर्मनस्विता । |
| (iv) किं रोषणाय रुचिरं | (द) वयं वा ननु तत् समम् । |

11. अधोलिखितेषु वाक्येषु रेखांकित पदानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत -

(अ) नोत्सहे श्लाघनीये काले वारयितुम् -
(i) गर्हणीये (ii) प्रशंसनीये (iii) निन्दनीये ।

(ब) आः अपण्डितः खलु भवान् ।
(i) विद्वान् (ii) चतुरः (iii) मूर्खः ।

(स) रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम् ।
(i) लक्ष्मणेन (ii) रामेण (iii) भरतेन

(द) परित्रायतां परित्रायतां कुमारः
(i) रक्ष्यताम् (ii) गम्यताम् (iii) आगम्यताम् ।

—x—x—



Scanned with CamScanner